# Mahadevakritam 1 Vishnu Stotram

# महादेवकृतं १ विष्णुस्तोत्रम्

## Document Information

Text title : Mahadevakritam 1 Vishnu Stotram

File name : mahAdevakRRitaM1viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | puruShottamakhaNDa | adhyAya 12/58-64||

Latest update : May 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 5, 2025

*sanskritdocuments.org*

# महादेवकृतं १ विष्णुस्तोत्रम्

महादेव उवाच ।
नारायण परन्धाम परमात्मन्परात्पर ।
सच्चिदानन्दविभव निरञ्जन नमोऽस्तु ते ॥ ५८॥

जगत्कारणसृष्ट्यादि कर्मकृद्गुणभेदतः ।
मायया निजया गुप्त स्वप्रकाश नमोऽस्तु ते ॥ ५९॥

नान्तर्बहिर्बहिश्चान्तर्दूरस्थो निकटाश्रयः ।
गुरुर्लघुः स्थिरोऽणीयान्स्थवीयांश्च नमोऽस्तु ते ॥ २.१२.६०॥

कोटयश्चतुरास्यस्य पलार्द्धं मम चातुल ।
यदपाङ्गविलासोत्थं तस्मै कालात्मने नमः ॥ ६१॥

एकैकरोमाकलितब्रह्माण्डगणसंवृतम् ।
मानातीतं वपुर्यस्य तस्मै विश्वात्मने नमः ॥ ६२॥

स्वकालपरिमाणेन वेधसः प्रलयोद्भवौ ।
मन्वन्तरादिघटनाकलनाय नमोऽस्तु ते ॥ ६३॥

सृष्टोऽहं तमसा नाथ त्वत्प्रभावानभिज्ञकः ।
तत्क्षमस्वापराधं मे त्राहि मां शरणागतम् ॥ ६४॥

इति श्रीस्कन्दपुराणे वैष्णवखण्डे पुरुषोत्तमजगन्नाथमाहात्म्ये
द्वादशाध्यायान्तर्गतं महादेवकृतं विष्णुस्तोत्रं समाप्तम् ।

स्कन्दपुराण । वैष्णवखण्ड । पुरुषोत्तमखण्ड । अध्याय १२/५८-६४॥

skandapurANa . vaiShNavakhaNDa . puruShottamakhaNDa . adhyAya 12/58-64..

Proofread by PSA Easwaran

*Mahadevakritam 1 Vishnu Stotram*

pdf was typeset on May 5, 2025

Please send corrections to *sanskrit@cheerful.com*